कक्षा–आचार्य प्रथमवर्ष
चतुर्थपत्रम् मिलिंदपन्हो
विषयः बौद्धदर्शनम्

प्रेषकः
प्रो. विजय कुमार जैन
राष्ट्रियसंस्कृतसंस्थानम्
लखनऊपरिसरः, लखनऊ

बौद्धदर्शनम्

आचार्य प्रथमवर्षम्

चतुर्थपत्रम् - मिलिन्दपञ्हो

अध्यापकः - प्रो॰ विजयकुमारजैनः

---

प्र॰1 पञ्चायतनानि, किन्नु नानाकर्मभिर्निर्वृत्तानि उताहो एकेन कर्मणे'ति ?

उत्तरम् - पञ्चायतनानि, नानाकर्मभिः निर्वृत्तानि, नैकेन कर्मणे'ति। यथा एकस्मिन् क्षेत्रे नानाबीजान्युप्येरन्, तेषां नानाबीजानां नानाफलानि निर्वर्तेरन्निति एवमेव यानि पञ्चायतनानि तानि तानि नानाकर्मभिःनिर्वृत्तानि, नैकेन कर्मणे'ति।

प्र॰2 केन कारणेन मनुष्या न सर्वे समानाः ?

उत्तरम् - यथा वृक्षा न सर्वे समानाः, बीजानां नानाकरणेन,ति एवमेव कर्मणां नानाकरणेन मनुष्या न सर्वे समानाः। भाषितम् भगवता - 'कर्मस्वकाः सत्वाः कर्मदायादाः कर्मयोनयः कर्मबन्धवः कर्मप्रतिशरणाः। कर्म सत्वान् विभजति, यदिदं हीनप्रणीततायाम्'इति।

प्र॰ प्रव्रज्या किम् ?

उत्तरम् - इदं दुःखं निरुन्ध्यात, अन्यच्च दुःखं नोत्पद्येते'ति